# Prapannamritastotram

# પ્રપન્નામૃતસ્તોત્રમ્

## Document Information

Text title : prapannAmRRitastotram

File name : prapannAmRRitastotram.itx

Category : vishhnu

Location : doc_vishhnu

Transliterated by : NA

Proofread by : Swamini Tattvapriyananda tattvapriya3108 at gmail.com

Description/comments : Stotra Sringeri

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# પ્રપન્નામૃતસ્તોત્રમ્

કલયતુ કલ્યાણગુણં કમલાકુચકુઙ્કુમાઙ્કિતોરસ્કમ્ ।
યદુવંશમૌક્તિકં તત્કિમપિ મહસ્સર્વદાऽપિ મમ હૃદયમ્ ॥ ૧॥

વન્દે તં દેવસુતં વસુદેવવધૂસ્તનન્ધયં કમપિ ।
વરદં વરેણ્યશીલં વલ્લવભવનાત્તલીલમિહ બાલમ્ ॥ ૨॥

વ્રજરચિતકેળિસુદતીવ્રજહૃદયાનન્દકન્દળં કિમપિ ।
વ્રજ હૃદય દિવ્યતેજો વૃજિનતમોમૂલભેદનપટિષ્ઠમ્ ॥ ૩॥

લીલામુદિતયશોદં લલિતપ્રસ્નિગ્ધમુગ્ધતરવાદમ્ ।
આકુઞ્ચિતૈકપાદં ભજ તેજઃ કિમપિ વિરચિતાહ્લાદમ્ ॥ ૪॥

હૃદયનવનીતચોરં પારદતરલાઙ્ઘ્રિકમલસઞ્ચારમ્ ।
પરિલુલિતગોપદારં ગૃહાણ યત્નેન કમપિ સુકુમારમ્ ॥ ૫॥

ગોપવધૂભોગાર્હં શેખરિતાનર્ઘબર્હિવરબર્હમ્ ।
ઘનવિભવપારિબર્હં કલયે હૃદયે ચિરાય દાશાર્હમ્ ॥ ૬॥

ગોખુરવિદારિતાવનિધૂળીધૂસરિતકુન્તલમુદારમ્ ।
સઞ્ચિન્તયેऽન્તરઙ્ગે સકુમારં કમપિ વલ્લવકુમારમ્ ॥ ૭॥

કમપિ ઘનાઘનનીલં ગોપવધૂટીકુચગ્રહવિલોલમ્ ।
કલયામિ ગોપબાલં લોલાલકજાલમધુકરિતભાલમ્ ॥ ૮॥

કુન્દવિનિન્દનરદનાન્મન્દિતપૂર્ણેન્દુબિમ્બરુચિવદનાન્ ।
મુનિહૃદયકેળિસદનાન્વ્રજવિભવાંસ્તાન્ભજે વિધુતમદનાન્ ॥ ૯॥

નન્દાનન્દનચન્દન મુચુકુન્દાનન્દકન્દ ગોવિન્દ ।
મમ વિન્દ હૃદરવિન્દં મિળિન્દસુન્દર મુકુન્દ નનુ મન્દમ્ ॥ ૧૦॥

કિમપિ યશોદાભાગ્યં વ્રજલલનાપૃથુલકુચયુગીભોગ્યમ્ ।
ક્ષામિ નીલરત્નં રમણીયં હૃદયસમ્પુટે નૂત્નમ્ ॥ ૧૧॥

મુરળીનિનાદરસભરતરળીકૃતતર્ણકવ્રજો ભજતામ્ ।
કોઽપિ ઘનાઘનશાવઃ કોમલરૂપોઽદ્ય દહરગહનં મે ॥ ૧૨॥

કાલિન્દીપુળિનાન્તરકકલિતવિહારં મનોજ્ઞમણિહારમ્ ।
તેજઃ કિમપિ વિલીનં જાગર્તુ મદીયહૃદિ રુચિરલીલમ્ ॥ ૧૩॥

કાનપિ ભજે વિલાસાન્કસ્તિવ્રજસુન્દરીરુચિરરાસાન્ ।
રાધાકટાક્ષદાસાન્ રાકાસિતકિરણસખહાસાન્ ॥ ૧૪॥

અતિમુગ્ધં દધિ લબ્ધું સુસ્નિગ્ધં વસ્તુ કિમપિ મમ સિદ્ધમ્ ।
ચારુમુખં તારસખસ્મેરનખં તચ્ચિરાદપારસુખમ્ ॥ ૧૫॥

વિકટાતિદર્પદુર્મદશકટાસુરધૂતિધુર્યચરણતલમ્ ।
પ્રકટાનુરાગરુચિરં સુકટાક્ષાન્મયિ તનોતુ તત્તેજઃ ॥ ૧૬॥

યમુનાકૂલવિહારં યમિનામધુનાઽપિ હન્ત બહુદૂરમ્ ।
મહદચ્યુતકૈશોરં મમ હૃદિ વિતનોતુ નિત્યસઞ્ચારમ્ ॥ ૧૭॥

બહુતરતરઙ્ગઘટ્ટિતયમુનાશુક્ત્યુદરગળિતમિવ નીલમ્ ।
મુક્તાફલં પ્રવિચલત્તત્ર વિચિત્રં વિભાવયે હૃદયે ॥ ૧૮॥

સોમાનનગોપીજનકૌમારહરં પ્રવાળલસદધરમ્ ।
તરુણં કમપિ મનોહરચરણં શરણં ભજે ધૃતાભરણમ્ ॥ ૧૯॥

ખઞ્જિતગોપીહૃદયં રઞ્જિતભુવનં શ્રયામિ ગોપશિશોઃ ।
સઞ્જીવિતગોસન્તતિ મઞ્જુળમઞ્જીરશિઞ્જિતં નૃત્તમ્ ॥ ૨૦॥

કાલીયફણમણિમધ્યે નીલતરં નૂત્નજાતમિવરત્નમ્ ।
તન્મૂર્ધન્યસ્તપદં ચૂડાલઙ્કરણમસ્તુ ધામ મમ ॥ ૨૧॥

સિતકરકિરણત્રસ્યદ્ગોપીરતિકેળિરચિતતિમિરભરમ્ ।
તત્કિમપિ ધામ હૃદયે નીલતરં નસ્તમો નિરાકુરુતામ્ ॥ ૨૨॥

નિર્મલતરમતિશિશિરં નિરુપમમવગાહતાં મનોરુચિરમ્ ।
નન્દકિશોરમનોહરશરીરતેજઃ કળિન્દજાપૂરમ્ ॥ ૨૩॥

મહ ઇહ મનસિ વિલગ્નં મણિમયકાઞ્ચીમનોહરવલગ્નમ્ ।
ગોપીકટાક્ષમગ્નં ગોપ્તું ક્ષમમેવમાં ભવવિધ્નિગ્નમ્ ॥ ૨૪॥

વિન્દે પદારવિન્દે મન્દેતરવિભવદે કૃતાનન્દે ।
નન્દકુલામન્દકલા વૃન્દવિલાસસ્ય કસ્યચિદ્ધામ્નઃ ॥ ૨૫॥

ઇતિમહિશૂરપુરોત્તમનરપતિચામેન્દ્રભૂપકુલગુરુણા ।
કલિતા સ્તુતિર્વિજયતાં શ્રીકૃષ્ણબ્રહ્મતન્ત્રકલિરિપુણા ॥ ૨૬॥

ઇતિ શ્રીકૃષ્ણ બ્રહ્મતન્ત્ર પરકાલ મહાદેશિકાનાં કૃતિષુ
પ્રપન્નામૃતસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Swamini Tattvapriyananda tattvapriya3108 at gmail.com

---

*Prapannamritastotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*